# shivamangalAShTakam

# શ્રીશિવમઙ્ગલાષ્ટકમ્

## Document Information

Text title : shivamangalAShTakam

File name : shivamangalAShTaka.itx

Category : aShTaka, shiva, mangala

Location : doc_shiva

Transliterated by : P. R. Ramamurthy

Description-comments : http://stotram.lalitaalaalitah.com/2011/03/hymns-to-shiva-shivamangalashtaka.html

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

shivamangalAShTakam

# શ્રીશિવમઙ્ગલાષ્ટકમ્

ભવાય ચન્દ્રચૂડાય નિર્ગુણાય ગુણાત્મને ।
કાલકાલાય રુદ્રાય નીલગ્રીવાય મઙ્ગલમ્ ॥ ૧॥

વૃષારૂઢાય ભીમાય વ્યાઘ્રચર્મામ્બરાય ચ ।
પશૂનાં પતયે તુભ્યં ગૌરીકાન્તાય મઙ્ગલમ્ ॥ ૨॥

ભસ્મોદ્ધૂલિતદેહાય વ્યાલયજ્ઞોપવીતિને ।
રુદ્રાક્ષમાલાભૂષાય વ્યોમકેશાય મઙ્ગલમ્ ॥ ૩॥

સૂર્યચન્દ્રાગ્નિનેત્રાય નમઃ કૈલાસવાસિને ।
સચ્ચિદાનન્દરૂપાય પ્રમથેશાય મઙ્ગલમ્ ॥ ૪॥

મૃત્યુંજયાય સાંબાય સૃષ્ટિસ્થિત્યન્તકારિણે ।
ત્ર્યંબકાય સુશાન્તાય ત્રિલોકેશાય મઙ્ગલમ્ ॥ ૫॥

ગંગાધરાય સોમાય નમો હરિહરાત્મને ।
ઉગ્રાય ત્રિપુરઘ્નાય વામદેવાય મઙ્ગલમ્ ॥ ૬॥

સદ્યોજાતાય શર્વાય દિવ્યજ્ઞાનપ્રદાયિને ।
ઈશાનાય નમસ્તુભ્યં પઞ્ચવક્ત્રાય મઙ્ગલમ્ ॥ ૭॥

સદાશિવસ્વરૂપાય નમસ્તત્પુરુષાય ચ ।
અઘોરાયચ ઘોરાય મહાદેવાય મઙ્ગલમ્ ॥ ૮॥

મઙ્ગલાષ્ટકમેતદ્વૈ શંભોર્યઃ કીર્તયેદ્દિને ।
તસ્ય મૃત્યુભયં નાસ્તિ રોગપીડાભયં તથા ॥ ૯ ॥

ઇતિ શ્રીશિવમઙ્ગલાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded by P R Ramamurthy

*shivamangalAShTakam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*